# पाठ-१५
# हिमालयो नाम नगाधिराजः

**सारान्शः**
हिमालयः भारतस्य उत्तदिशायां स्थितः । एषः हिमेन आवृतः सदा, अतः हिमालयः । पर्वतेषु उन्नततमः, अतः सः पर्वतराजःपर्वतराजः।हिमालयस्य पूर्वदिशि 'बंगाल की खाड़ी' इति नाम समुद्रः पश्चिमदिशि च अरबसागरः इति।एवं हि 'अरुणाचलप्रदेशात् कश्मीरप्रदेशपर्यन्तं हिमालयः पृथिव्याः परिणामरूपः दण्ड इव स्थितः अस्ति ।हिमालयस्य सौन्दर्यम् तु अद्भुतमेव ।हिमालये उपरि तापः भवति नीचैः मध्यभागे वा वर्षाकारणात् शैत्यम् भवति ।गजाः कपोलस्थं कण्डूः दूरीकरणाय तत्र देवदारुवृक्षेषु घर्षणं कुर्वन्ति । ततः वृक्षेभ्यः दुग्धं स्रुतं भवति । तस्य दुग्धस्य गंधः सर्वत्र व्याप्तः भवति।हिमालये मृगान्वेषणे तत्पराः किराताः त्रिविधं वायुं सेवन्ते -

- गङ्गाधारायाः जलबिन्दुभिः युक्तः वायुः।
- प्रकम्पितदेवदारुयुक्तः वायुः।
- मयूराणां पक्षान् विकीर्णयन् वायुः।

हिमालयः शरणागतवत्सलः महापुरुष इव अस्ति ।

**मुख्य बिन्दवः**
**कविपरिचयः**-कालिदासः 'कविकुलगुरुः' इति प्रसिद्धः । अनेन रचिताः सप्त ग्रन्थाः सन्ति। यथा 'रघुवंशम्', 'कुमारसंम्भवम्' इति महाकाव्यद्वयम्, 'ऋतुसंहारः', 'मेघदूतम्' इति खण्डकाव्यद्वयम्, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', 'अभिज्ञानशाकुन्तलम्' इति त्रीणि नाटकानि च।
**देशः**-कालिदासस्य देश-कालयोः विषये विदुषां नैकं मतं विद्यते। परं महाकविना मेघदूते 'उज्जयिनी' श्री विशाला वा इति विशेषरूपेण वर्णिता । अतः 'कालिदासः उज्जयिनी निवासी' आसीत् इति विदुषां मतं वर्तते ।
**कालः**-प्रायः मन्यते यत् कालिदासः 'उज्जयिनीनरेशस्य शकारेः विक्रमादित्यस्य नवरत्नेषु श्रेष्ठः आसीत्। विक्रमसंवत्-प्रवर्तकस्य विक्रमादित्यस्य राज्याभिषेककालः ईसातः पूर्वम् 57 वर्षाणि मन्यते । अतः कालिदासस्य कालः ई०पू० प्रथमशताब्दी इति निश्चितः भवति ।

**अवगच्छामः**
अन्य ग्रन्थेषु हिमालयस्य वर्णनम्-
**ब्रह्माण्डपुराणे-**
कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ।
पूर्वपश्चिमगावेतावर्णवान्तरूपस्थितौ ।।
**शिवपुराणे-**
अस्त्युत्तरस्यां दिशि वै गिरीशो हिमवान्महान् ।
पर्वतो हि मुनिश्रेष्ठ महातेजास्समृद्धिभाक् ।।
पूर्वापरौ तोयनिधी सुविगाय स्थितो हि यः ।
नानारत्नकरो रम्यो मानदण्ड इव क्षितेः ।।
**वामनपुराणे-**
धन्योऽयं पर्वतश्रेष्ठः श्लाध्यः पूज्यश्च देवतैः ।
**अथर्ववेदे-**
"गिरयसो पर्वता हिमवन्तोरण्यं ते पृथ्वि स्योनमस्तु" । (21.1.11)

**आवश्यकोऽयं ज्ञानम्**
**रघुवंशम्-** अस्मिन् महाकाव्ये 19 सर्गाः सन्ति । दिलीपतः अग्निवर्णपर्यन्तं राज्ञां वर्णनं विद्यते इयम् उत्कृष्टा काव्यरचना कालिदासस्य ।
**ऋतुसंहारम्-**इयं कालिदासस्य प्रथमा कृतिः । अत्र षण्णाम् ऋतूनां सरलं सरसं मनोरमं च वर्णनं विद्यते। षट् सर्गाः सन्ति ।
**मेघदूतम्-**प्राकृतिक सौन्दर्येण मानसिकभावोद्गाराणां सुन्दरी अभिव्यक्तिः । शापवशात् विरहाकुलस्य यक्षस्य स्वप्रियां प्रति प्रेषितः भावपूर्णः सन्देशः अस्ति।
**मालविकाग्निमित्रम्-**नाटकेऽस्मिन् विदिशायाः नृपस्य अग्निमित्रस्य विदर्भस्य च राजकुमार्याः मालविकायाः प्रणयकथा अस्ति। नाटके पंच अंकाः सन्ति ।
**विक्रमोर्वशीयम्-**अस्मिन् नाटके राज्ञः पुरुरवसः 'उर्वशी' अप्सरायाः च प्रेमकथानकम् अस्ति। नाटके पंच अंकाः सन्ति ।
**अभिज्ञानशाकुन्तलम्-**अस्मिन् नाटके राज्ञः दुष्यन्तस्य शकुन्तलायाः च प्रणयकथायाः मनोहारि चित्रणम् अस्ति। नाटके सप्त अंकाः सन्ति। काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला इति प्रसिद्धम् ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**क्त-प्रत्ययः -** धातोः भवति। क्त प्रत्ययान्त पदं क्रियापदं विशेषणपदं च भवति ।
**यथा** कृ + क्त = 1. तेन श्रमः कृतः (क्रि.)
2. कृतः श्रमः बालः (वि.)
**सकर्मकधातुभिः** सह 'क्त' प्रत्ययः कर्मणि भवति तदा वाक्ये कर्तरि तृतीया कर्मणि च प्रथमा विभक्तिः भवति। कर्मपदे यत् लिङ्गं वचनं च भवति तदेव क्त प्रत्ययान्त शब्देऽपि ।
**यथा**-बालेन लेखः लिखितः ।

**अकर्मकधातुभिः योगे** तु 'क्त' कर्तरि भावे च भवति । कर्तरिप्रयोगे तु कर्तृपदानुसारं प्रथमा विभक्तिः भवति । यथा-मोहनः गतः (पु.)
**तुमुन्प्रत्ययः-** निमित्तार्थक क्रियारूपं निष्पादनाय धातोः परे तुमुन् (तुम्) प्रत्ययः भवति। तुमुन्प्रत्यययुक्तं पदम् 'अव्ययम्' भवति । यथा-सः नाटकं द्रष्टुं गच्छति।
**'ल्यप् प्रत्ययः**- एतेन पूर्वकालिकक्रिया निष्पन्ना भवति। यदि धातोः पूर्वं कश्चन उपसर्ग: भवति तदा 'क्त्वा' स्थाने 'ल्यप्' (य) भवति।
**यथा**-किराताः छायां (नि + सेव् + ल्यप्) निषेव्य= गच्छन्ति।

**शब्दार्थाः**

1. आमेखलं = पर्वतों के मध्य भाग तक
2. उद्वेजिताः = तंग आकर
3. विनेतुं = मिटाने के लिए
4. प्रसूतः = उत्पन्न
5. सुरभीकरोति = सुगन्धित करता है।
6. लीनं = छिपे हुए
7. प्रपन्ने = प्राप्त होने पर
8. शीकराणां = बूँदें

**योग्यतां वर्धयत**

'हिमालयः' भारतस्य महान् पर्वतः अस्ति। एषः न केवलं हिमस्य आलयः अपितु ओषधीनाम् आलयः, रत्नानाम् आकरः अपि । प्राकृतिकसौन्दर्येण पूर्णः अयम्। एषः सर्वोच्च शिखरः अतः अयं पर्वतराजः कथ्यते। 'पावनगङ्गायाः उद्गमस्थलम् अपि अस्ति । अतः पवित्रः अस्य प्रदेशः ।

**पाठ संप्रेष्यः**

- हिमालयः पर्वतराजः अस्ति । एषः भारतस्य उत्तरदिशायां स्थितः । अस्य उन्नतानि शिखराणि हिमपूरितानि सन्ति । एष पृथिव्याः परिमाणरूपः ।
- हिमालयादेव गङ्गा निर्गच्छति ।
- हिमालयस्य प्राकृतिक सौन्दर्यम् अद्भुतमेव ।
- स्वल्पः दोषः गुणसमूहे विलीयते ।
- महापुरुषाः शरणागतं क्षुद्रमपि रक्षन्ति।
- 'क्त' कृत्प्रत्ययः । 'क्त' प्रत्यययुक्तं पदं भूतकालिकक्रिया रूपं विशेषणरूपं च भवति। 'तुमुन्' प्रत्ययान्तं पदम् अव्ययपदं भवति ।
- 'ल्यप् प्रत्ययः पूर्वकालिकक्रियार्थे उपसर्गयुक्तेन धातुना सह प्रयुज्यते ।
- अन्यपदप्रधानः बहुव्रीहिः भवति ।
- गच्छत्, धनवत्, इन्दु, मधु युग्मशब्दरूपेषु भेदः भवति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- मूल पाठस्य सस्वर अभ्यासं कुरुत।